# रक्षोघ्न सूक्त

॥ रक्षोघ्न सूक्त ऋग्वेदः मंडलं ४ अथवा १० ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवां इभेन ।

तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ ४.००४.०१

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।

तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ॥ ४.००४.०२

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।

यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत ॥ ४.००४.०३

उदग्ने तिष्ठ प्रत्या तनुष्व न्य१मित्राँ ओषतात्तिग्महेते ।

यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम ॥ ४.००४.०४

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।

अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून ॥ ४.००४.०५

स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत ।

विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत ॥ ४.००४.०६

सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।

पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ४.००४.०७

अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ।

स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून ॥ ४.००४.०८

इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून ।

क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम ॥ ४.००४.०९

यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।

www.yousigma.com

तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत ॥ ४.००४.१०

महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।

त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ४.००४.११

अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।

ते पायवः सध्र्यंचो निषद्याग्ने तव नः पान्त्वमूर ॥ ४.००४.१२

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन ।

ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ ४.००४.१३

त्वया वयं सधन्यअस्त्वोतास्तव प्रणीत्यश्याम वाजान ।

उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ ४.००४.१४

अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।

दहाशसो रक्षसः पाह्यअस्मान्द्रुहो निदो मित्रमहो अवद्यात ॥ ४.००४.१५

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।

शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम ॥ १०.०८७.०१

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।

आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन ॥ १०.०८७.०२

उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च ।

उतान्तरिक्षे परि याहि राजंजम्भैः सं धेह्यभि यातुधानान ॥ १०.०८७.०३

यज्ञैरिषूः संनममानो अग्ने वाचा शल्यां अशनिभिर्दिहानः ।

ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्येषाम ॥ १०.०८७.०४

अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम ।



www.yousigma.com

प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम ॥ १०.०८७.०५

यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम ।

यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः ॥ १०.०८७.०६

उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात ।

अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदन्त्वेनीः ॥ १०.०८७.०७

इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।

तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम ॥ १०.०८७.०८

तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्रांचं वसुभ्यः प्र णय प्रचेतः ।

हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥ १०.०८७.०९

नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा ।

तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥ १०.०८७.१०

त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।

तमर्चिषा स्फूर्जयंजातवेदः समक्षमेनं गृणते नि वृङ्धि ॥ १०.०८७.११

तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम ।

अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥ १०.०८७.१२

यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।

मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान ॥ १०.०८७.१३

परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।

परार्चिषा मूरदेवांछृणीहि परासुतृपो अभि शोशुचानः ॥ १०.०८७.१४

पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः ।

www.yousigma.com

वाचास्तेनं शरव ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥ १०.०८७.१५

यः पौरुषेयेण क्रविषा समंक्ते यो अश्व्येन पशुना यातुधानः ।

यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥ १०.०८७.१६

संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः ।

पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यंचमर्चिषा विध्य मर्मन ॥ १०.०८७.१७

विषं गवां यातुधानाः पिबन्त्वा वृश्च्यन्तामदितये दुरेवाः ।

परैनान्देवः सविता ददातु परा भागमोषधीनां जयन्ताम ॥ १०.०८७.१८

सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।

अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥ १०.०८७.१९

त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात ।

प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥ १०.०८७.२०

पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन ।

सखे सखायमजरो जरिम्णेऽग्ने मर्तां अमर्त्यस्त्वं नः ॥ १०.०८७.२१

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।

धृषद्वर्णं दिवेदिवे हन्तारं भंगुरावताम ॥ १०.०८७.२२

विषेण भंगुरावतः प्रति ष्म रक्षसो दह ।

अग्ने तिग्मेन शोचिषा तपुरग्राभिरृष्टिभिः ॥ १०.०८७.२३

प्रत्यग्ने मिथुना दह यातुधाना किमीदिना ।

सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥ १०.०८७.२४

प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति ।

www.yousigma.com

यातुधानस्य रक्षसो बलं वि रुज वीर्यम ॥ १०.०८७.२५

www.yousigma.com